( यथा च, मनुः । ५ । ९६ ।
"सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥" )

लोकबान्धवः, पुं, ( लोकानां बान्धवः । ) सूर्य्यः । इति जटाधरः ॥

लोकबाह्यः, पुं, ( लोकात् लोकसमाचारात् बाह्यः । ) सर्व्वाचारवर्ज्जितः । यथा,—
"लोकबाह्यस्तु यो वाजिगवाद्याचारवर्ज्जितः ॥"
इति जटाधरः ॥

लोकमाता, स्त्री, ( लोकानां मातेव । ) लक्ष्मीः । इत्यमरः ॥ ( लक्षणया लोकजननीमात्रापि च । यथा, भागवते । २ । ३ । ५ ।
"प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥" )

लोकलोचनं, क्ली, ( लोकानां लोचनमिव । ) सूर्य्यः । इति शब्दरत्नावली ॥ ( जनस्य लोचनञ्च । यथा, कथासरित्सागरे । १८ । ९२ ।
"सोऽथ स्तनतृपार्श्वघातेन यस्मिन्निर्दरितः शरः ।
जगाम वाप्पतिजवादलक्ष्यो लोकलोचनैः ॥" )

लोकविनायकः, पुं, ( लोके विनायक इव । ) गण-विशेषः । यथा,—
"स्कन्दग्रहादयो ये च बालकग्राहकादयः ।
कौमारास्ते भुवि ज्ञेया ये च लोकविनायकाः ।
षट्सप्ततिसंख्याता मर्त्त्यलोकविचारिणः ॥"
इति वह्निपुराणम् ॥

लोकविश्रुतिः, स्त्री, ( लोके विश्रुतिः । ) जनश्रुतिः । किंवदन्ती । इति केचित् ॥

लोकायतं, क्ली, ( लोकेषु आयतं विस्तीर्णमिव । ) तर्कभेदः । चार्व्वाकशास्त्रम् । इत्यमरभरतौ ॥

लोकायतिकः, पुं, ( लोकायतं शास्त्रमस्त्यस्येति । लोकायत+ठन् । ) चार्व्वाकः । इति हेम-चन्द्रः ॥ ( तार्किकः । यथा, हरिवंशे । २४८ । ३० ।
"ऐक्यनानात्मसंयोगसमवायविशारदैः ।
लोकायतिकमुख्यैश्च शुश्रुवुः स्वनमीरितम् ॥" )

लोकालोकः, पुं, ( लोक्यतेऽसौ इति लोकः । न लोक्यतेऽसौ इति अलोकः । ततः कर्म्म-धारयः । ) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । चक्रवाड़ः २ । इत्यमरः ॥ हे साब्धिद्वीपां महीमावेष्ट्य प्राकारवत् स्थिते गिरौ लोकालोक इति स्वनामख्याते । अन्तर्लोक्यते सूर्य्यरश्मिभिः स्पृश्यमानत्वात् इति लोकः । तथा बहिः सूर्य्यकिरणास्पर्शात् न लोक्यते इति अलोकः । लोक्र लौके कर्म्मणि घञ् लोकश्चासौ अलोक-श्चेति लोकालोकः । चक्रं महीचक्रं वकति वेष्टयति चक्रवाड़ः । वकि ड वेष्टे च यज्-ज्ञापकचिह्नस्यानित्यत्वात् न नुम् । इति भरतः ॥ ( यथा, रघुः । १ । ६८ ।
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥"
अस्य विवरणं यथा देवीभागवते । ८ । १४ । १-१५ ।
श्रीनारायण उवाच ।
"ततः परस्तादचलो लोकालोकेति नामकः ।
अन्तराले च लोकालोकयोर्यः परिकल्पितः ॥
यावदस्ति च देवर्षे ह्यन्तरं मानसोत्तरात् ।
सुमेरोस्तावती शुद्धा काञ्चनी भूमिरस्ति हि ॥
दर्पणोदरतुल्या सा सर्व्वप्राणिविवर्ज्जिता ।
यस्यां पदार्थः प्रहितो न किञ्चित् प्रत्युदीयते ॥
अतः सर्व्वप्राणिसत्त्वरहिता सा च नारद ! ।
लोकालोक इति ख्याता यदत्र परिकल्पिता ॥
लोकालोकान्तरे चास्य वर्त्तते सर्व्वदा स्थितिः ।
ईश्वरेण सलोकानां त्रयाणामन्तगः कृतः ॥
सूर्य्यादीनां ध्रुवान्तानां रश्मयो यदनुग्रहात् ।
अर्व्वाचीनाश्च यौँ लोकानातन्वाना; कदापि हि ॥
पराचीनत्वभाजो हि न भवन्ति च नारद ! ।
तावदुन्नहनायामः पर्व्वतेन्द्रो महोदयः ॥
एतावाँल्लोकविन्यासोऽयं संख्यामानलक्षणैः ।
कविभिः स तु पञ्चाशत्कोटिभिर्गणितस्य च ॥
भूगोलस्य चतुर्थांशो लोकालोकाचलो मुने ! ।
तस्योपरि चतुर्दिक्षु ब्रह्मणा चात्मयोनिना ॥
निवेशिता दिग्गजा ये तन्नामानि निबोधत ।
ऋषभः पुष्पचूड़ोऽथ वामनोऽथापराजितः ॥
एते समस्तलोकस्य स्थितिहेतव ईरिताः ।
तेषाञ्च स्वविभूतीनां बहुवीर्य्योपबृंहणम् ॥
विशुद्धसत्त्वमैश्वर्य्यं वर्द्धयन् भगवान् हरिः ।
आस्ते सिद्धाष्टकोपेतो विष्वक्सेनादिसंवृतः ॥
निजायुधैः परिवृतो भुजदण्डैः समं ततः ।
आस्ते सकललोकस्य स्वस्तये परमेश्वरः ॥
आकल्पमेवं वेशं स गतो विष्णुः सनातनः ।
स्वमायारचितस्यास्य गोपीथायात्मसाधनः ॥
योऽन्तर्व्विस्तार एतेन ह्यलोकपरिमाणकम् ।
व्याख्यातं यद्बहिर्लोकालोकाचल इतो-
इयात् ॥" ॥ )

लोकश्च अलोकश्च तौ । सूर्य्याद्यालोकविशिष्ट-तद्रहितदेशौ । अत्र द्विवचनप्रयोगः स्यात् । यथा, भागवते । ५ । २० । ३४ ।
"ततः परस्तात् लोकालोकनामाचलो लोका-लोकयोरन्तराले परित उपक्षिप्तः ॥" )

लोकेशः, पुं, ( लोकानामीशः । ) ब्रह्मा । इत्य-मरः ॥ बुद्धभेदः । इति त्रिकाण्डशेषः । पारदः । इति राजनिर्घण्टः ॥ ( इन्द्रः । यथा, रघुः । ३ । ६६ ।
"यथा च वृत्तान्तमिमं सदोगत-
स्त्रिलोचनैकांशतया दुरासदः ।
तवैव सन्देशहरादिशांपतिः
शृणोति लोकेश ! तथा विधीयताम् ॥"
लोकपालः । यथा, मनुः । ५ । ९७ ।
"लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्त्यानां लोकेशप्रभवाप्ययम् ॥"
लोकाधिपतौ, च । यथा, भागवते । ३ । ६ । १९ ।
"पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥" )

लोकेश्वरः, पुं, ( लोकानामीश्वरः । ) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ भुवनानां जनानां प्रभुश्च ॥ ( यथा, महाभारते । १ । ११४ । १९ ।
"अवशोदय कौन्तेय दत्तमात्रा मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥" )
लोकपालः । यथा, महाभारते । ८ । ३४ । २९ ।
"ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम् ।
सुरासुरप्रेतपितॄणां पतीन् लोकेश्वरान्
भयान् ॥" )

लोकेश्वरात्मजा, स्त्री, ( लोकेश्वरस्य बुद्धस्य आत्म-जेव । ) बुद्धशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ अदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति हेमचन्द्रः ॥

लोच, ऋ क भाषि । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) ऋ, अलुलोचत् । भाषि दीप्तौ । किन्तु पुरुषोत्तमशरणदेवौ भाष इति मूर्द्धन्यषकारं मत्वा वचनार्थमाहतुः । इति दुर्गादासः ॥

लोच, ऋ ङ ईक्षे । इति दुर्गादासः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ईक्षः पर्य्यालोचनं प्रणि-धानमिति यावत् । ऋ, अलुलोचत् । ङ, लोचते कार्य्यं सुधीः । इति दुर्गादासः ॥

लोचं, क्ली, ( लोचते पर्य्यालोचयति सुखदुःखा-दिकमिति । लोच+अच् । ) अश्रु । इति जटाधरः ॥

लोचकः, पुं, ( लोचते इति । लोच+ण्वुल् । ) मांसपिण्डम् । अक्षितारका । कज्जलम् । स्त्रीणां ललाटाभरणम् । कदली । नीलवस्त्रम् । निर्ब्बुद्धिः । कर्णपूरः । मूर्व्वी । भ्रूयचर्म्म । इति मेदिनी । के, ५० ॥ निर्म्मोकः । इति शब्दरत्नावली ॥

लोचनं, क्ली, ( लोचतेऽनेनेति । लोच+ल्युट् । ) चक्षुः । इत्यमरः ॥ तस्य शुभाशुभलक्षणं यथा,—
"वक्रान्तैः पद्मपत्राभैर्लोचनैः सुखभागिनः ।
मार्जारलोचनैः पापो महात्मा मधुपिङ्गलैः ॥
क्रूराः केकरनेत्राश्च हरिणाक्षाः सकल्मषाः ।
जिह्मैश्च लोचनैः क्रूराः सेनान्यो गजलोचनाः ॥
गम्भीराक्षा ईश्वराः स्युर्मन्त्रिणः स्थूलचक्षुषः ।
नीलोत्पलाक्षा विद्वांसः सौभाग्यं श्यावचक्षु-
षाम् ॥
स्यात् कृष्णतारकाक्षाणामक्ष्णामुत्पाटनं किल ।
मण्डलाक्षाश्च पापाः स्युर्निःस्वाः स्युर्दीर्घ-
लोचनाः ॥
दृक् स्निग्धा विपुला भोगे अल्पायुर्नाभि-
वन्नता ।
विशालोन्नता सुखिनो दरिद्रा विषमभ्रुवः ॥"
इति गारुड़े ६५ अध्यायः ॥

लोचनहिता, स्त्री, ( लोचनाभ्यां हिता । ) तुत्याञ्ज-नम् । इति राजनिर्घण्टः ॥